# ४ मुगल-साम्राज्यम्



मध्यकाले कस्यापि सम्राजः कृते भारतीयोपमहाद्वीपसदृशे विशालक्षेत्रे, यत्र जनेषु संस्कृतिषु च बह्व्यः अधिकाः विविधताः सन्ति, शासनस्य कार्यम् अत्यन्तम् एव कठिनम् आसीत् । मुगलाः स्वपूर्ववर्तिनां विपरीतं कस्यचित् एकस्य साम्राज्यस्य स्थापनां कृतवन्तः तत् कार्यं च पूर्णं कृतं यत् अधुना यावत् केवलम् अल्पावधीनां कृते एव सम्भवं दृश्यते स्म । मुगलाः षोडशशताब्द्याः उत्तरार्धकालात् देहलीतः आगरातः च स्वस्य राज्यस्य विस्तारम् आरब्धवन्तः अथ च सप्तदशशताब्द्यां प्रायशः सम्पूर्णे उपमहाद्वीपे अधिकारं प्राप्तवान् । ते प्रशासनस्य संरचना-शासनसम्बन्धिनः च येषां विचाराणां क्रियान्वयनं कृतवन्तः ते विचाराः तेषां राज्यस्य पतनान्तरम् अपि व्यवहारे आसन् । एषः कश्चन एतादृशः राजनैतिकः न्यासः आसीत् यस्य प्रभावः अस्य उपमहाद्वीपस्य परवर्तिशासकेषु अपि दृश्यते स्म । वर्तमानसमये भारतस्य प्रधानमन्त्री स्वतन्त्रतादिवस्य अवसरे मुगलशासकानां निवासस्थानात् देहल्याः लालकिला इत्यस्य प्राचीरतः राष्ट्रं सम्बोधयति ।

**चित्रम् - १**
**रक्तदुर्गः**

## मुगलाः के आसन् ?

मुगलाः द्वयोः महाशासकवंशयोः वंशजाः आसन् । मातुः पक्षतः ते चीनदेशस्य मध्य-एशियायाः मंगोलशासकस्य चंगेजखानस्य उत्तराधिकारिणः आसन् । यस्य मृत्यु १२२७ तमे वर्षे अभूत् । ते पितुः पक्षतः ईरानस्य इराकस्य एवञ्च वर्तमानतुर्कीदेशस्य शासकतैमूरस्य



वंशजाः आसन्। यस्य मृत्युः १४०४ तमे वर्षे अभवत्। परन्तु मुगलाः आत्मानं मुगलख्यात्या अथवा मंगोल इति ख्यात्या स्वस्य ख्यापनं न इच्छन्ति स्म । एतादृशम् एतदर्थम् आसीत् यतोहि चंगेजखानेन सम्बद्धाः स्मृतयः शतशः व्यक्तीनां नरसंहारात् सम्बद्धाः आसन् । एताः एव स्मृतयः मुगलानानां प्रतियोगिभिः उजबेगैः अपि सम्बद्धाः आसन् । अपरस्मिन् पक्षे मुगलाः वयं तैमूरवंशजाः इति आत्मनि गर्वस्य अनुभवं कुर्वन्ति स्म, आधिक्येन एतदर्थम् आसीत् यतोहि तेषाम् एषः महान् पूर्वजः १३९८ तमे वर्षे देहल्याम् आधिपत्यं कृतवान् आसीत्।

**चित्रम्** – २

तैमूरस्य तस्य उत्तराधिकारिणां मुगलसम्राजां च एकं लघुचित्रं (१७०२-१२) । मध्ये तैमूरः अस्ति तस्य दक्षिणपक्षे तस्य पुत्रः मीरन-शाह अस्ति यः प्रथमस्य मुगलसम्राजः बाबरस्य वृद्धप्रपितामहः आसीत्। तस्य च अनन्तरम् अबुसेदः सः बाबरस्य पितामहः आसीत्, तैमूरस्य वामपक्षे सम्राट् मोहम्मद-मिर्जा अस्ति यः बाबरस्य प्रपितामहः आसीत् अथ च उमरशेखः अस्ति यः बाबरस्य पिता आसीत् । तैमूरस्य दक्षिणपक्षे तृतीयः चतुर्थः पञ्चमः च जनः क्रमशः बाबरः अकबरः तथा च शाहजहाँ सन्ति तस्य च वामपक्षे तेन एव क्रमेण हुमायूँ-महोदयः जहाँगीरः औरंगजेबः च सन्ति।

? किम् एतत् चित्रं दर्शयति यत् मुगलराजत्वस्य स्वप्रभुत्वप्रतिपादनं जन्मसिद्धस्य अधिकारस्य रूपेण कुर्वन्ति स्म ?



ते स्वस्य वंशावल्याः निरूपणं चित्रं निर्मापयित्वा कृतवन्तः । प्रत्येकं मुगलशासकः तैमूरेण सार्धं स्वस्य चित्रं निर्मापितवान्। प्रथमं चित्रं पश्यन्तु, एतत् तैमूरस्य मुगलानां च सामूहिकं चित्रं प्रस्तौति।

## मुगलसैन्याभियानम्

प्रथमः मुगलशासकः बाबरः (१५२६ -१५३०) यदा १४९४ तमे वर्षे फरघानाराज्यस्य उत्तराधिकारं प्राप्तवान्, तदा तस्य वयः केवलं द्वादशवर्षीयः आसीत् । मंगोलानां द्वितीया शाखा, उजबेग इत्येतेषाम् आक्रमणानां कारणतः तया स्वस्य पैतृकसिंहासनं त्यक्तव्यम् अभवत् । सः अनेकानि वर्षाणि यावत् इतस्ततः व्यर्थाटनं कृत्वा अन्ततः १५०४ तमे वर्षे काबुले स्वाधिपत्यम् अकरोत् । सः १५२६ तमे वर्षे देहल्याः सम्राजम् इब्राहिमलोदीं पानीपतयुद्धे पराजितवान् एवञ्च देहल्याम् आगरायां च स्वाधिपत्यम् स्थापितवान् ।



चित्रम् – ३ , मुगलसेना अभियाने

प्रथमायां तालिकायां मुगलानां प्रमुखाणि सैन्याभियानानि दर्शितानि सन्ति । एताम् अवधानेन पठन्तु । किं भवन्तः एतस्मिन् लम्बतरे घटनाक्रमे काञ्चित् पुनरावृत्तिम् अन्वेष्टुं शक्नुवन्ति ? उदाहरणार्थं भवन्तः अवधानं दास्यन्ति यत् अफगानजनाः मुगलसत्तायाः कृते तात्कालिकसङ्कटरूपाः आसन् । सप्तमाध्याये मुगलाहोमयोः सम्बन्धविषये अष्टमाध्याये दशमाध्याये च सिक्खानां विषये अथ च मेवाड-मारवाडयोः सम्बन्धविषये नवमाध्याये अवधानं कुर्वन्तु । अकबर-हुमायूँ इत्यनयोः सफाविद-ईरान इत्यनेन सह सम्बन्धे किम् अन्तरम् आसीत् ? किम् औरंगजेबस्य शासनकाले गोलकुंडायाः बीजापुरस्य च अधिग्रहणेन दक्कने युद्धस्य समाप्तिः अभवत् ?



**चित्रम् – ४**

***षोडशशताब्द्याः युद्धेषु शतघ्नीनां स्फोटकानां च प्रथमवारं प्रयोगः अभवत् । बाबरः एतेषां युद्धास्त्राणां शस्त्राणां च पानीपतस्य प्रथमे युद्धे प्रभाविरूपेण प्रयोगं कृतवान् ।***

तालिका १

## मुगल-साम्राजः

### प्रमुखाभियानानि घटनाः च



**बाबरः १५२६ - १५३०**

*१५२६ तमे वर्षे पानीपतस्य क्रीडाङ्गने इब्राहिमलोदी एवञ्च तस्य अफगानसमर्थकान् पराजितवान्।*
*१५२७ तमे वर्षे खानुवायां राणासांगामहोदयः राजपूतराज्ञः तेषां समर्थकान् च पराजितवान्।*
*१५२८ तमे वर्षे चंदेर्यां राजपूतान् पराजितवान्।*
*स्वस्य मृत्योः पूर्वं देहल्याम् आगरायां च मुगलनियन्त्रणं च स्थापितवान्।*

**हूमायूँ १५३० - १५४०, १५५५ - १५५६**



*हूमायूः स्वस्य मरणासन्नस्य पितुः अन्त्यादेशस्य अनुसारं सम्पत्तेः वण्टनं कृतवान्। प्रत्येकं भ्राता कञ्चन एकं प्रान्तं प्राप्तवान्। तस्य भ्रातुः मिर्जाकामरानस्य महत्त्वाकाङ्क्षाणां कारणेन हूमायूः स्वस्य अफगानप्रतिद्वन्द्विनां पुरतः निर्बलः अभवत्। शेरखानः हूमायूं १५३९ तमे वर्षे चौसायां १५४० तमे वर्षे च कन्नौजे इति वारद्वयं पराजितवान्। एतासां पराजयानां कारणेन सः ईरानदेशं प्रति पलायितुं बाध्यः जातः।*

**अकबरः १५५६ - १६०५**



*अकबरः त्रयोदशवर्षस्य अल्पायुषि सम्राट् जातः। तस्य शासनकालः त्रिषु अवधिषु विभक्तुं शक्यते। (१) १५५६, १५७० इति वर्षयोः मध्ये अकबरः स्वस्य संरक्षकात् बैरमखानात् स्वस्य गृहस्थेभ्यः कर्मचारिभ्यः च स्वतन्त्रः अभवत्।सः सूरी इत्यस्य अन्येषां च अफगानानाम्, मालवा गोंडवाना इति निकटवर्तिराज्ययोः अथ च स्वस्य वैमात्रभ्रातुः मिर्जाहाकिमस्य उजबेकानां च विद्रोहान् अभिभवितुं सैन्याभियानानि चालितवान्। सः १५६८ तमे वर्षे सिसौदियानां राजधान्यां चित्तौडे अथ च १५६९ तमे वर्षे रणथम्भौरे आधिपत्यं स्थापितवान्।*

*(२) १५७०, १५८५ च तमयोः वर्षयोः मध्ये गुर्जरं विरुद्ध्य सैनिकाभियानि अभवन्। एतेषाम् अभियानानाम् अनन्तरं सः पूर्वस्मिन् बिहारे बङ्गे उडीसायां च अभियानानि चालितवान्, यानि अभियानानि १५७९ -८० तमे वर्षे मिर्जाहाकिमस्य पक्षे जातविद्रोहम् इतोऽपि जटिलं कृतवान्।*

*(३) १५८५ - १६०५ इत्यस्मिन् काले अकबरस्य साम्राज्यस्य विस्तारः अभवत्। उत्तर-पश्चिमे सैन्याभियानानि चालितानि। सफाविदजनान् पराजित्य कान्धारे अधिकारं कृतवान् अथ च काश्मीरं स्वराज्ये मेलितवान्। मिर्जाहाकिमस्य मृत्योः अनन्तरं काबुलः अपि तेन स्वराज्ये मेलितः। सः दक्कने अभियानानां प्रारम्भः अभवत् अथ च बरारं खानदेशम् अहमदनगरस्य च काञ्चन भागान् अपि स्वराज्ये मेलितवान्। स्वस्य शासनस्य अन्तिमेषु वर्षेषु अकबरस्य सत्ता राजकुमारस्य सलीमस्य विद्रोहणानां कारणेन दुर्बला जाता। एषः एव सलीमः कालक्रमेण सम्राट्-जहांगीरः इति नाम्ना विख्यातः जातः।*



जहांगीरः १६०५ -1627

जहांगीरः अकबरस्य सैन्याभियानानि अग्रेसराणि कृतवान् । मेवाडस्य सिसोदियाशासकः अमरसिंहः मुगलानां सेवां अङ्गीकृतवान् । तदनन्तरं सिक्खानाम् अहोमानाम् अहमदनगरस्य च विरुद्धं यानि अभियानानि चालितानि तानि पूर्णतः सफलानि न जातानि । जहांगीरस्य शासनस्य अन्तिमेषु वर्षेषु राजकुमारखर्रमः विद्रोहं कृतवान् यः पश्चात् शाहजहां इति आख्यातः । जहांगीरस्य पत्नी नूरजहां शाहजहाँ इत्येतम् अधिकारविहीनं कर्तुं यान् प्रयासान् कृतवती ते असफलाः जाताः ।

शाहजहाँ १६२७ - १६५८



शाहजहां इत्यस्य नेतृत्वे दक्कने मुगलसैन्याभियानानि निरन्तरम् अचलन् । अफगानसामन्तः खानजहानलोदी विद्रोहं कृतवान् किन्तु सः पराजितः अभवत् । अहमदनगरं विरुद्ध्य सैन्याभियानम् अभवत् यस्मिन् बुंदेलानां पराजयः अभवत् अपि च ओरछायाः उपरि अधिकारः अभवत् । उत्तरपश्चिमे बल्ख इत्येतं स्वाधीनं कर्तुम् उजबेगान् विरुद्ध्य अभियानम् प्रवृत्तं यच्च असफलम् अभवत् । परिणामतः कान्धारः सफाविदजनाम् अधिकारे आगतः । अन्ततः १६३२ तमे वर्षे अहमदनगरं मुगलानां राज्याधीनम् अभवत् । बीजापुरस्य सेना शान्त्यर्थं सन्धिप्रस्तावं निवेदितवती । १६५७-५८ तमे वर्षे शाहजहांवर्यस्य पुत्राणां मध्ये उत्तराधिकारविषयकः कलहः प्रारब्धः । एतस्मिन् औरंगजेबस्य विजयः अभवत् अपि च दाराशिकोहादयः त्रयोऽपि भ्रातरः मृत्युपथं नीताः । शाहजहांवर्यस्य अवशिष्टं जीवनम् आगरायाः कारागारे व्यतीतम् अभवत् ।

औरंगजेबः १६५८ – १७०७



१६६३ तमे वर्षे उत्तर-पूर्वे आहोमानां पराजयः अभवत् परन्तु ते १६८० तमे वर्षे पुनः विद्रोहं कृतवन्तः । उत्तर-पश्चिमे यूसफजई इत्येतेषां सिक्खानां च विरुद्धम् अभियानानि अस्थायिरूपेण सफलानि जातानि । मारवाडस्य राठौडराजपुत्राः मुगलानां विरोधे विद्रोहं कृतवन्तः । एतस्य कारणं तेषाम् आन्तरिक-राजनीतेः उत्तराधिकारस्य च विषयेषु मुगलानां हस्तक्षेपः आसीत् । प्रारम्भे मुगलसैन्याभियानानि मराठानायकं शिवाजियं विरुद्ध्य सफलानि अभवन् परन्तु औरंगजेबः शिवाजयः अपमानं कृतवान् शिवाजी च आगरा-स्थितात् मुगलकारागारात् पलायितः । सः आत्मानं स्वतन्त्रशासकं घोषयित्वा पश्चात् मुगलान् विरुध्य पुनः सैन्याभियानानि चालितवान् । राजकुमारः अकबरः औरंगजेबम् इत्येतं विरुध्य विद्रोहं कृतवान्, यस्मिन् सः मराठानां दक्कनानां च साम्राज्यस्य सहयोगं प्राप्तवान् अन्ततः सः सफाविदम् ईरानं पलायितवान् ।

(२) अकबरस्य विद्रोहस्य अनन्तरम् औरंगजेबः दक्कनस्य शासकानां विरुद्धं सेनाः प्रेषितवान् । १६८५ तमे वर्षे बीजपुरे तथा च १६८७ तमे वर्षे गोलकुडां मुगलाः स्वस्मिन् राज्ये मेलितवन्तः । औरंगजेबः १६८५ तमे वर्षे दक्कने मराठानां विरुद्धं सैन्याभियानस्य प्रबन्धं स्वयं कृतवान्, ते प्रच्छन्नयुद्धपद्धतेः प्रयोगं कुर्वन्ति स्म । औरंगजेबः उत्तरभारते सिक्खानां जाटानां सतनामिनाम् उत्तरपूर्वे अहोमानां दक्कने च मराठानां विद्रोहानां सम्मुखीकरणं कर्तुं बाध्यः जातः । तस्य मृत्योः पश्चात् उत्तराधिकारार्थं युद्धस्य प्रारम्भः अभवत् ।




*मानचित्रम् – १*
*अकबरस्य*
*शासनम्, १६०५*

## उत्तराधिकारस्य मुगलपरम्पराः

मुगलाः ज्येष्ठाधिकारस्य नियमे न विश्वसन्ति स्म यस्मिन् ज्येष्ठपुत्रः स्वस्य पितुः राज्यस्य उत्तराधिकारी भवति स्म । एतस्य विपरीतम् उत्तराधिकारे ते सहदायादस्य मुगलवंशस्य तैमूरवंशस्य च प्रथाम् अङ्गीकुर्वन्ति स्म यस्यां परम्परायाम् उत्तराधिकारस्य विभाजनं समस्तपुत्रेषु क्रियते स्म । प्रथमायां तालिकायां प्रदत्तानि वर्णयुक्तानि उद्धरणानि पठन्तु तथा च मुगलराजकुमाराणां विरोधप्रमाणेषु अवधानं कुर्वन्तु । भवताम् अनुसारम् उत्तराधिकारस्य कः उपायः सम्यक् आसीत् –ज्येष्ठाधिकारः अथवा सहदायादः ?

## मुगलानाम् अन्यैः शासकैः सार्धं सम्बन्धाः

प्रथमां तालिकां पुनः पश्यन्तु । भवन्तः द्रक्ष्यन्ति यत् मुगलैः तेषां शासकानां विरुद्धं नैरन्तर्येण सैन्याभियानानि कृतानि, ये तेषां सत्ताम् अस्वीकृतवन्तः । यदा मुगलाः शक्तिशालिनः अभवन् तदा केचन शासकाः स्वेच्छया तेषां सत्तां स्वीकृतवन्तः । राजपूताः इति एतस्य उपयुक्तम् उदाहरणम् अस्ति । अनेके मुगलसमुदायेषु स्वपुत्रीणां विवाहं कृत्वा उच्चपदानि प्राप्तवन्तः । परन्तु केचन विरोधम् अपि कृतवन्तः । सिसोदियाराजपुत्राः मेवाडस्य सिसोदियाराजपुत्राः चिरकालं यावत् मुगलानां सत्तां न स्वीकृतवन्तः परन्तु यदा ते पराजिताः जाताः तदा मुगलाः तैः सार्धं सम्माननीयं व्यवहारं कृतवन्तः अपि च मुगलाः तेभ्यः तेषां जागीर अर्थात् भूसम्पदं साम्राज्यभूसम्पद्-रूपेण प्रत्यर्पितवन्तः । पराजितान् करिष्यामः परन्तु अपमानितान् न करिष्यामः इति द्वयोः विषययोः मध्ये सावधानतया

**राजपूतैः सह मुगलानां विवाहाः**

जहांगीरस्य माता कच्छवायाः राजकुमारी आसीत् । सा अम्बरस्य (वर्तमानकाले यः जयपुरे अस्ति) राजपूतशासकस्य पुत्री आसीत् । शाहजहांवर्यस्य माता काचित् राठौड- राजकुमारी आसीत् । सा मारवाडस्य (जोधपुरस्य) राजपूत शासकस्य पुत्री आसीत् ।

मुगलैः यत् सन्तुलनं कृतं तेन मुगलाः भारतस्य अनेकेषां शासकानाम् उपरि स्वकीयं प्रभावं वर्धितवन्तः । परन्तु एतत् सन्तुलनं नैरन्तर्येण भवेत् इति एतत् कार्यं कठिनम् आसीत् । एकदा पुनः प्रथमां तालिकां पश्यन्तु। चिन्तनं कुर्वन्तु यत् यदा शिवाजी मुगलसत्तां स्वीकर्तुम् आगतवान् तदा औरंगजेबः तस्य अपमानं कृतवान् । एतस्य अपमानस्य कः परिणामः अभवत् ?

## पदवन्तः भूस्वामिनः च

यथा यथा साम्राज्ये विभिन्नानि क्षेत्राणि सम्मिलितानि अभवन्, तथा तथा मुगलाः विविधानां सामाजिकसमूहानां सदस्यान् प्रशासने नियोक्तुम् आरब्धवन्तः । सामाजिकसमूहानां सदस्यान् प्रशासने नियोक्तुम् आरब्धवन्तः । प्रारम्भे अधिकतराः क्षेत्राधिपतयः तुर्कदेशीयाः आसन् परन्तु कालान्तरेण मुगलाः एतेन तुर्कदेशीयानां क्षेत्राधिपतीनां लघुसमूहेन सह शासकवर्गे ईरानवासिनः भारतीयान् मुस्लिमजनान् अफगानवासिनः राजपूतान् मराठान् अन्यसमूहान् च नियोजितवन्तः । ये मुगलानां प्राशासनिकं सेवाकार्यं कुर्वन्ति स्म ते “मनसबदार” इति उच्यन्ते स्म ।

“मनसबदार” इति शब्दस्य प्रयोगः एतादृशानां जनानां कृते भवति स्म, ये मनसब इति अर्थात् किमपि सर्वकारिपदं प्राप्नवन्ति स्म । इयं मुगलैः स्थापिता श्रेणी व्यवस्था आसीत्, यया (1) पदं (2) वेतनम् एवञ्च (3) सैन्यदायित्वानि च निर्धार्यन्ते स्म । पदस्य वेतनस्य च निर्धारणं जात इति केनचित् सङ्ख्यामानेन निश्चितः भवति स्म । जातस्य मानं यावत् अधिकं भवति स्म तावत् राजसभायाम् अभिजातस्य प्रतिष्ठा भवति स्म अपि च तस्य वेतनम् अपि तावत् एव अधिकं भवति स्म ।

यानि सैन्यदायित्वानि मनसबदारपदवद्भ्यः दीयन्ते स्म तदनुसारम् एव ते सावार अर्थात् अश्वारोहिणः नियोजयति स्म । पदवन्तः स्वस्य आरोहिणां निरीक्षणार्थम् आनयन्ति स्म । ते स्वस्य सैनिकानाम् अश्वान् तप्तलोहमुद्रया अङ्कयन्ति स्म अपि च सैनिकानां पञ्जीकरणं कारयन्ति स्म । एतेषां क्रियान्वयनानन्तरम् एव ते सैनिकेभ्यः वेतनं दातुं धनं प्राप्नुवन्ति स्म ।

पदवन्तः अथवा राजपुरुषाः स्वस्य वेतनं राजस्वस्य एकत्रितकर्त्र्याः भूमेः रूपेण प्राप्नुवन्ति स्म, ये भूस्वामिनः (जागीर) इति उच्यन्ते स्म अपि च याः प्रायः “इक्ताओं” इति एतासां समम् आसीत् ।

**जातस्य श्रेण्यः**

५००० जातमानवताम् अभिजातानां स्थितिः १००० जातमानवद्भ्यः अभिजातेभ्यः उन्नता आसीत् । अकबरस्य शासनकाले २९ मसबदारपदवन्तः तादृशाः आसन् येषां पदवी ५००० इति जातमानतुल्यम् आसीत् । औरंगजेबस्य शासनकालं यावत् एतादृशानां पदविमतां सङ्ख्याः ७९ इति अभवत् ।



परन्तु पदवीमन्तः, मुक्ति इत्येताभ्यः भिन्नः स्वस्य भूमौ न वसन्ति स्म अपि च नैव तासु प्रशासनं कुर्वन्ति स्म। तेषां पार्श्वे स्वस्य भूमिभ्यः केवलं **राजस्वस्य** एकत्रीकरणस्य अधिकारः आसीत्। एतत् राजस्वं तेषां राजपुरुषाः तेषां कृते एकत्रीकुर्वन्ति स्म, परन्तु ते स्वयं देशस्य कस्मिंश्चित् अन्यस्मिन् भागे सेवारताः भवन्ति स्म।

***चित्रम् – ५***
***स्वस्य आरोहिभिः सह कश्चन पदवीमान् अभियाने***

अकबरस्य शासनकाले एतासां भूमिनां सावधानतया आकलनं क्रियते स्म, यतोहि एतेषां राजस्वं मनसबदार इत्यस्य वेतनस्य समानं भवेत्। औरङ्गजेबस्य शासनकालं यावत् स्थितिः परिवर्तिता। अधुना प्राप्तराजस्वं मनसबदार इत्यस्य वेतनस्य अपेक्षया अतिन्यूनम् आसीत्। मनसबरदारजनानां सङ्ख्यायाम् अपि अत्यधिका वृद्धिः अभवत्, यतः ते जगीर इत्यस्याः प्राप्तेः पूर्वं महतीं प्रतीक्षां कर्तुं बाध्याः आसन्। एतैः सर्वैः कारणैः भूमिखण्डानाम् (जागीर) सङ्ख्या न्यूना अभवत्। परिणामतः बहवः जागीरदारजनाः जागीर इत्यस्यां सत्याम् एतं प्रयासं कुर्वन्ति स्म यत् यावत् शक्यं तावत् राजस्वं समाहर्तुं शक्नयुः। औरङ्गजेबः स्वस्य शासनकालस्य अन्तिमेषु वर्षेषु एतेषु परिवर्तनेषु नियन्त्रणं कर्तुं न शक्तवान्।।

## जब्त एवञ्च भूस्वामिनः (जमीदार)

मुगलानाम् आयस्य प्रमुखं साधनं कृषकाणाम् उत्पादनतः प्राप्तराजस्वम् आसीत्। अधिकतरेषु स्थानेषु कृषकाः ग्रामीणकुलीनानाम् अर्थात् प्रमुखानाम् अथवा स्थानीयभूपतीनां माध्यमेन राजस्वं यच्छन्ति स्म। समस्तानां मध्यस्थानां कृते भवन्तु नाम ते स्थानीयग्रामस्य प्रमुखाः अथवा पुनः शक्तिशालिनः क्षेक्षाधिपतयः मुगलाः एकस्य एव "जमीदार" (भूस्वामी) इति शब्दस्य प्रयोगं कुर्वन्ति स्म। अकबरस्य राजस्वमन्त्री टोडरमलः दशवर्षाणाम् (१५७० - १५८०) कालावधेः कृते कृषेः उत्पादनस्य, मूल्यानां कृषिभूमेः च सावधानतया सर्वेक्षणं कृतवान्। एतेषा दत्तांशानाम् आधारेण प्रत्येकं सस्यार्थं प्रत्यक्षधनस्य रूपेण करः सुनिश्चितः कृतः।



**चित्रम् – ५**
शाहजहांवर्यस्य राजकालस्य एकस्य लघुचित्रस्य विवरणानि। अत्र जहांगीरस्य समयस्य भ्रष्टाचारः दर्शितः अस्ति – (१) भ्रष्टाधिकारिणः उत्कोचं गृह्णन्, (२) एकः कराधिकारी निर्धनकृषकान् दण्डयन्।

प्रत्येकं राज्यं राजस्वदृष्ट्या मण्डलेषु विभक्तम् अपि च प्रत्येकं सस्यस्य कृते राजस्वमात्रायाः पृथक् सूची कृता। राजस्वप्राप्तेः इयं व्यवस्था "जब्त" इति उच्यते स्म। एषा व्यवस्था तेषु स्थानेषु प्रचलिता आसीत् यत्र मुगलप्रशासनिकाधिकारिणः भूमेः निरीक्षणं कर्तुं शक्नुवन्ति एवञ्च स्म सावधानतया तासाम् आयव्ययविवरणं स्थापयितुं शक्नुवन्ति स्म। एतादृशं निरीक्षणं गुर्जरबङ्गसदृशेषु प्रान्तेषु सम्भवं न अभवत्।
केषुचित् क्षेत्रेषु भूस्वामिनः एतावन्तः शक्तिशालिनः आसन् यत् मुगलप्रशासकैः शोषणस्य स्थितौ ते विद्रोहं कर्तुं शक्नुवन्ति स्म। कदाचित् समानजातेः भूस्वामिनः कृषकाः च मुगलसत्तायाः विरोधे मिलित्वा विद्रोहं कुर्वन्ति स्म। सप्तदशशताब्द्याः अन्तिमेषु वर्षेषु एतादृशाः कृषकविद्रोहाः मुगलसाम्राज्यस्य स्थायित्वस्य कृते आह्वानानि आसन्।

## *अकबर-नामा आइने-अकबरी च*



चित्रम् – ७ **अबुल-फज्लतः अकबरनामां स्वीकुर्वन् अकबरः**

अकबरः स्वस्य घनिष्ठमित्रं राजसभासदम् अबुलफज्लं च आदिष्टवान् यत् सः तस्य शासनकालस्य इतिहासं लिखेत्। अबुल-फज्लः एतम् इतिहासं त्रिषु खण्डेषु लिखितवान् तस्य शीर्षकं च अस्ति अकबरनामा इति। प्रथमे खण्डे अकबरस्य पूर्वजानाम् उल्लेखः अस्ति अपरः खण्डः अकबरस्य शासनकालस्य घटनानां विवरणं ददाति। तृतीये खण्डे आइने-अकबरी इति अस्ति। एतस्मिन् अकबरस्य प्रशासनस्य, राजकुटुम्बस्य, सेनायाः, राजस्वस्य, साम्राज्य-भूगोलस्य च वर्णनं लभ्यते। एतस्मिन् समकालिकभारतस्य जनानां परम्पराणां संस्कृतीनां च विस्तृतं वर्णनम् अस्ति। आइने-अकबरी इत्यस्य रोचकतरः पक्षः विविधप्रकारस्य वस्तूनां सस्यानाम् उत्पादनस्य मूल्यानां पारिश्रमिकस्य राजस्वस्य च साङ्ख्यिकीयं विवरणम् अस्ति।

### अकबरस्य नीतयः सूक्ष्मम् ईक्षणम्

अकबरः प्रशासनस्य मुख्याभिलक्षणानि निर्धारितवान् आसीत् अपि च एतेषां विस्तृतवर्णनम् अबुलफज्लस्य अकबरनामा इत्यस्मिन् विशेषतया आइने-अकबरी इत्यस्मिन् च लभ्यते। अबुलफज्लस्य अनुसारं साम्राज्यम् अनेकेषु प्रान्तेषु विभक्तम् आसीत्, ये 'सूबा' इति उच्यन्ते स्म। राज्याणां प्रसाशकाः सूबेदार अर्थात् प्रान्ताधिपतयः इति उच्यन्ते स्म, ये राजनैतिकानां सैनिकनां च इत्येतयोः द्वयोः कार्ययोः निर्वहणं कुर्वन्ति स्म। प्रत्येकं प्रान्ते कश्चन वित्तीयः अधिकारी अपि भवति स्म यः "दीवान" इति उच्यते स्म।

सूबेदार अर्थात् प्रान्ताधिपतिः विध्यर्थं व्यवस्थार्थं च अन्येषाम् अधिकारीणां सहयोगः प्राप्नोति स्म यथा – "बक्शी" (सैनिकानां वेतनाधिकारी), "सदर" (धार्मिकस्य धर्मार्थं च क्रियमाणानां कार्याणां मन्त्री) "फौजदार" (सेनानायकः) अपि च "कोतवाल" (नगरस्य आरक्षक-अधिकारी)।

## जहांगीरस्य राजसभायां नूरजहाँ इत्यस्य प्रभावः



**चित्रम्** – ८ नूरजहाँ इत्यस्याः आदेशः

मेहरुन्निसा १६११ तमे वर्षे जहांगीरं परिणीतवती अपि च सा "नूरजहाँ" इति ख्यातिं प्राप्तवती। नूरजहां सदा जहांगीरं प्रति निष्ठावती आसीत् यथाकालं च तस्य सहयोगं कृतवती। नूरजहां इत्यस्याः सम्माने जहांगीरेण रजतनिष्काः अनुमोदिताः येषु एकस्मिन्पक्षे तस्य स्वस्य उपाधयः उत्कीर्णाः आसन् अपि च अपरस्मिन् पक्षे "सम्राज्ञ्याः नूरजहांयाः नाम्ना ग्रथितम्" इदं वाक्यं उत्कीर्णम् आसीत्। वामपक्षे प्रदत्ताभिलेखः, नूरजहाँद्वारा प्रदत्तादेशः अस्ति। चतुष्कारा मुद्रा ज्ञापयति "उदात्तायाः महत्याः साम्राज्ञ्याः नूरजहां-पादशाह-बेगम इत्यस्याः आदेशः"। गोलाकारायाः मुद्रायाः अनुसारम् "सम्राजः शाहजहांगीरस्य प्रतापेन महासम्राज्ञी चन्द्रसदृशी वैभवशालिनी जाता, वयं कामनां कुर्मः यत् नूरजहां पादशाहा एतस्य युगस्य सर्वोत्तमा महिला भवेत्।

अकबरस्य अभिजाताः (प्रशासकाः) विशालसेनायाः सञ्चालनं कुर्वन्ति स्म तथा च ते अत्यधिक-राजस्वस्य व्ययं कर्तुं शक्नुवन्ति स्म। यावत् पर्यन्तं ते निष्ठावन्तः आसन् तावत् पर्यन्तं साम्राज्यस्य कार्यं सफलतापूर्वकं निष्पन्नं भवति स्म् परन्तु सप्तदशशताब्द्याः अन्तपर्यन्तं बहुभिः अभिजातैः स्वतन्त्ररूपेण सम्बन्धविस्तारः आरब्धः। तेषां साम्राज्यं प्रति निष्ठा तेषां व्यक्तिगतहित-कारणतः दुर्बला जाता असीत्।

यदा अकबरः १५७० तमे वर्षे फतेहपुरसीकरी इत्यत्र आसीत्, तदा सः उलेमा-ब्राह्मण-जेसुइट-पादरी- जरदुश्त इति अनेकेषां धर्माणाम् अनुयायिभिः सह धर्मविषयणीं चर्चाम् आरब्धवान्। एताः चर्चाः इबादतखाना इत्यस्मिन् अभवन्। अकबरस्य रुचिः विभिन्नानां जनानां धर्मेषु रीति-नीतिषु च आसीत्। एतेन विचार-विमर्शेन अकबरस्य एतादृशं ज्ञानं सुदृढं जातं ये विद्वांसः धार्मिकरीतीनां मतान्धतायाः च महत्त्वम् अधिकं मन्यन्ते ते प्रायः स्वमते दृढनिष्ठावन्तः भवन्ति। तेषां शिक्षाः प्रजायाः विभाजनं करोति एवञ्च असामञ्जस्यम् उत्पादयन्ति। एते अनुभवाः अकबरं सुलह-ए-कुल इति अर्थात् सर्वत्र शान्तिः इति विचारं प्रति आकृष्टवन्तः। इयं सहिष्णुतायाः धारणा विभिन्नानां धर्माणाम् अनुयायिनां मध्ये भेदं न उत्पादयति स्म अपितु एतस्याः केन्द्रबिन्दुः नीतिशास्त्रस्य काचित् एका व्यवस्था आसीत् यस्याः क्रियान्वयनं सर्वत्र भवितुं शक्नोति स्म यस्यां च केवलं सत्यतायाः न्यायस्य शान्तेः च महत्त्वम् आसीत्।



**अबुल-फज्लः सुलह-ए-कुल इति विचाराधारितायाः शासन-दृष्टेः निर्माणे अकबरस्य साहाय्यं कृतवान् । जहांगीरः शाहजहां च इत्येतौ अपि शासनस्य एतं सिद्धान्तं अङ्गीकृतवन्तौ ।**

**चित्रम् – ९**

इबादतखाना इत्यस्मिन् अकबरः विभिन्नधर्माणां विद्वद्भिः सह चर्चयन् अस्ति ।

एतस्मिन् चित्रे किं भवन्तः जेसुइट-पादरी इत्येतान् परिचेतुं शक्नुवन्ति ?

## सुलह-ए-कुल इति

अकबरस्य सुलह-ए-कुल इत्यस्य नीतेः तस्य पुत्रः जहांगीरः अनेन प्रकारेण वर्णनं कृतवान् अस्ति –

ईश्वरस्य महत्याम् अनुकम्पायां सर्वेषां वर्गाणां तथा च सर्वेषां धर्माणाम् अनुयायिनां समानं स्थानम् अस्ति । अतः तस्य विशाले साम्राज्ये, यं परितः विद्यमानाः सीमाः केवलं समुद्रद्वारा एव निर्धार्यन्ते स्म विरोधिधर्माणाम् अनुयायिनाम् अपि च विभिन्नप्रकाराणां शोभन-विचाराणां दुष्टविचाराणां च कृते स्थानम् आसीत् । अत्र असहिष्णुतायाः मार्गः पिहितः आसीत् । अत्र सुन्निमुस्लिमाः शियामुस्लिमाः च एकस्मिन् एव यवनमन्दिरे एकत्रिताः भवन्ति स्म तथा च ईसायिजनाः यहूदिजनाः च एकस्मिन् एव क्राईस्टमन्दिरे प्रार्थनां कुर्वन्ति स्म । सः सुसङ्गतप्रकारेण "सार्वभौमिकशान्तेः" अर्थात् सुलह-ए-कुल इत्यस्य सिद्धान्तस्य पालनं कृतवान् ।

### सप्तदशशताब्द्यां तदनन्तरं च मुगलसाम्राज्यम्

मुगलसाम्राज्यस्य प्रशासनिक-सैनिककुशलतयोः कारणात् आर्थिक-वाणिज्यिकसमृद्धौ वृद्धिः अभवत्। वैदेशिकाः यात्रिणः अस्य वर्णनं समृद्धदेशरूपेण कृतवन्तः यत् तद्वत् कथादिषु अपि वर्णितम् अस्ति । परन्तु एते यात्रिणः एतया प्रचुरतया सार्धं प्रसरितां दरिद्रतां दृष्ट्वा विस्मिताः अभवन्। यतो हि सामाजिक-असमानताः स्पष्टतया दृश्यन्ते स्म । सम्राड् शाहजहाँ इत्यस्य शासनकालस्य विंशतितमस्य वर्षस्य अभिलेखैः वयं जानीमः यत् एतादृशाः ८००० मनसबदारजनाः ये उच्चतमं पदं प्राप्तवन्तः आसन्, तेषु आहत्य ४४५ इत्येतावन्तः एव आसन्। आहत्य मनसबदारजनानाम् अल्पसङ्ख्यायाः ५.६ प्रतिशतम् एव साम्राज्यस्य अनुमानितस्य राजस्वस्य ६१.५ प्रतिशतं लभते स्म यत् तेषां व्यक्तिगतम् एवञ्च तेषाम् अश्वारोहिणां वेतनरूपम् आसीत्।

मुगलसम्राट् तस्य मनसबदारजनाः च स्वस्य आयस्य बृहत्तमं भागं वेतने वस्तुषु च नियोजयन्ति स्म । एतेन व्ययेन शिल्पकाराः कृषकाः च लाभान्विताः भवन्ति स्म, यतोहि ते वस्तूनां सस्यानां च पूर्तिं कुर्वन्ति स्म । परन्तु राजस्वस्य भारः एतावान् आसीत् यत् प्राथमिकानाम् उत्पादकानां कृषकाणाम् एवञ्च शिल्पकाराणां पार्श्वे निवेशार्थम् अल्पतरं धनम् अवशिष्टं भवति स्म । एतेषु ये निर्धनतमाः आसन्, कठिनतया एव उदरपूर्तिं कुर्वन्ति स्म। ते उत्पादनशक्तेः वर्धनार्थम् अतिरिक्तसंसाधनेषु अस्त्रेषु अन्यवस्तुषु च निवेशस्य विषये चिन्तयितुम् अपि न शक्नुवन्ति स्म । एतादृश्याम् अर्थव्यवस्थायाम् आढ्यतराः कृषकाः शिल्पकाराणां समूहाः, व्यापारिणः महाजनाः च अत्यधिकं लाभं प्राप्नुवन्ति स्म।

मुगलानां कुलीनवर्गस्य पार्श्वे प्रभूतानि धनानि संसाधनानि च आसन्, येषां कारणतः सप्तदशशताब्द्याः अन्तिमेषु वर्षेषु ते अत्यधिकाः शक्तिशालिनः अभवन्। यथाकालं मुगलसम्राजां सेवकाः स्वयमेव सत्तायाः शक्तिशालिकेन्द्रभूताः अभवन्। एतेषु केचन नूतनानां वंशानां स्थापनां कृतवन्तः अपि च हैदराबाद - अवधसदृशेषु प्रान्तेषु स्वकीयं नियन्त्रणं स्थापितवन्तः । यद्यपि ते देहल्याः मुगलसम्राजं स्वामिनः रूपेण मान्यतां यच्छन्ति स्म, तथापि अष्टादशशताब्दीं यावत् साम्राज्यस्य अनेके प्रान्ताः स्वस्य स्वतन्त्रराजनैतिकपरिचयं प्राप्तवन्तः आसन् । एतस्मिन् विषये वयं दशमे अध्याये विस्तरेण चर्चयिष्यामः।

**अन्यत्र** **नृपाः राज्ञ्यः च**

षोडशशताब्द्यां, मुगलानां प्रायः समकालिकाः संसारस्य विभिन्नेषु भागेषु अपि अनेके महान्तः राजानः राज्ञ्यः च आसन् । एतेषु ऑटोमन-तुर्क्याः शासक-सुलेमानः (१५२० – १५६६) सम्मिलिताः सन्ति । तस्य राजशासने ऑटोमनराज्यस्य विस्तारः यूरोपस्य दिशि अभवत् । सः हंगरीं स्वस्य राज्येन सह मेलितवान् अपि च ऑस्ट्रियाम् आवृतवन्तः । तस्य सैन्यदलानि बगदादम् इराकम् अपि स्वायत्तीकृतवन्ति । मोरक्को इति यावत् उत्तरी-अफ्रीकायाः अधिकतरः भागः ऑटोमनसत्तायाः शासनम् अङ्गीकरोति स्म । सुलेमानः ऑटोमन-नौसेनायाः पुनर्गठनं कृतवान् । पूर्विभूमध्यसागरस्य क्षेत्रेषु अस्याः नौसेनायाः प्रभुत्वस्य कारणेन स्पेनदेशेन सह तस्य प्रतिस्पर्धा अभवत् । अरबसागरे एषा नौसेना पुर्तगालिनः आहूतवन्तः । सम्राजे अल-कानूनी" इत्यस्य अर्थात् विधिनिर्मातुः पदवीं दत्तवन्तः । यतोहि तस्य शासनकाले अधिकसङ्ख्यायां नियमान् अधिनियमान् च रचितवन्तः आसन् । एतेषां नियमानां लक्ष्यम् इदम् आसीत् यत् वर्धमानस्य साम्राज्यस्य विभिन्नानि क्षेत्राणि मनसि निधाय प्रशासनिकानाम् उपायानां मानकीकरणं भवेत् यतोहि कृषकाः सेवाकार्यात् अधिकात् राजस्वात् च रक्षिताः भवेयुः । कालक्रमेण सप्तदशशताब्द्याम् ऑटोमन-क्षेत्रेषु यदा सार्वजनिक-व्यवस्थायाः पतनम् अभवत् तदा सुलेमान-कानूनी इत्यस्य कालम् आदर्शशासनकालस्य रूपेण स्मरणं क्रियते स्म ।

? अन्येषाम् अकबरस्य समकालिकानां शासकानां विषये जानन्तु – इंग्लैंडदेशस्य शासकराज्ञी एलिजाबेथः (१५५८ -१६०३), ईरानस्य सफाविदशासकशाहाब्बासः (१५८८-१६२९), अपि च एतेभ्यः अधिकतरः विवादास्पदः रूसशासकः जार-ईवान-चतुर्थ-बेसिलयेविचः (१५३०- १५८४) यः "ईवान–दि-टेरिबलः" नाम्नः कुख्यातः अस्ति ।

**कल्पनां कुर्वन्तु**



*बाबरः अकबरः च यदा शासकौ अभवतां तदा तौ भवताम् एव समवयौ आस्ताम् । कल्पनां कुर्वन्तु यत् भवन्तः पैतृकसम्पत्तेः रूपेण किञ्चन राज्यं प्राप्चवन्तः सन्ति । भवन्तः स्वराज्यं स्थायिनं समृद्धं च कथं करिष्यन्ति ?*

## *पुनः स्मरन्तु*

*१ समीचीनान् युग्मान् रचयन्तु –*

| | |
|---|---|
| *मनसब* | *मारवाडः* |
| *मंगोलः* | *गवर्नरः* |
| *सिसौदिया-राजपूतः* | *उजबेगः* |
| *राठौर-राजपूतः* | *मेवाडः* |
| *नूरजहां* | *पदम्* |
| *प्रान्ताधिपतिः* | *जहांगीरः* |

बीज-शब्दा:

मुगल:,

पदवीवान्,

भूस्वामिन:,

जात:,

आरोही,

सुलह्-ए-कुल इति,

ज्येष्ठाधिकार:,

सहदायाद:,

जब्त इति,

भूस्वामी ।

*२ रिक्तस्थानानि पूरयन्तु ;*

*(क) --------- अकबरस्य विमातृज-भ्रातु: मिर्जाहाकिमस्य राज्यस्य राजधानी आसीत् ।*

*(ख) दक्कनस्य पञ्चसाम्राज्यानि बरार:, खानदेश:, अहमद-नगरं --------च --- आसन् ।*

*(ग) यदि जात इति मनसबदारजनस्य पदस्य वेतनस्य च द्योतक: आसीत्, तर्हि आरोहिन: तस्य ---इत्येतं दर्शयति स्म ।*

*(घ) अकबरस्य मित्रम् अपि च परामर्शदाता, अबुलफज्ल: तस्य ---- इत्यस्य विचारं बलात् पालने साहाय्यं कृतवन्त: येन स: विभिन्नसंस्कृतिभ्य: धर्मेभ्य: जातिभ्य: च निर्मितसमाजे राज्यं कर्तुं शक्तवान् ।*

*३ मुगलसाम्राज्यस्य अधीनस्था: केन्द्रिया: प्रान्ता: के के आसन ?*

*४ मनसबदार एवञ्च जागीर इत्येतयो: च क: सम्बन्ध: आसीत् ।*

*आगच्छन्तु जानीम:*

*५ मुगलप्रशासने भूस्वामिनां (जमीदारजनानाम्) का भूमिका आसीत्?*

*६ शासन-प्रशासन-सम्बन्धिन: अकबरस्य विचाराणां निर्माणे धार्मिकै: विद्वद्भि: जायमाना: चर्चा: कियत्य: महत्त्वपूर्णा: आसन् ?*

*७ किमर्थं मुगला: आत्मनं मङ्गोलवंशजानाम् अपेक्षया तैमूकवंशजा: इति सम्बोधने अधिकं महत्त्वं दत्तवन्त: ?*

*आगच्छन्तु विचारयाम:*

*८ भू-राजस्वत: प्राप्त: आय: मुगलसाम्राज्यस्य स्थायित्वस्य कृते आवश्यक: आसीत् ?*

*९ मुगलानां कृते केवलं तूरानी अथवा ईरानी एव न, अपितु विभिन्नपृष्ठभूमिनां मनसबदारजनानां पदवीमतां नियुक्ति: महत्त्वपूर्णा आसीत् ?*

*१० मुगलसाम्राज्यस्य समाज: वर्तमानं भारतम्, अद्य अपि अनकै: सामाजिकै: सांस्कृतिक-घटकै: निर्मितम् अस्ति ? किम् एतत् राष्ट्रियस्य एकीकरणस्य कृते किमपि आह्वानम् अस्ति ?*

*११ मुगलसाम्राज्यस्य अर्थव्यवस्थायाः कृते कृषकाः अनिवार्याः आसन् । किं भवन्तः चिन्तयन्ति यत् ते अद्य अपि एतावन्तः एव महत्त्वपूर्णाः सन्ति ? किम् अद्य भारते धनाढ्यस्य निर्धनस्य च मध्ये आयस्य अन्तरं मुगलानां कालस्य अपेक्षया कुत्रचित् आधिक्येन वर्धितम् अस्ति ?*

### *आगच्छन्तु कृत्वा पश्यामः*

*१२ उपमहाद्वीपस्य विभिन्नेषु क्षेत्रेषु मुगलसाम्राज्यस्य अनेकप्रकारकाः प्रभावाः अभवन् । जानन्तु यत् यस्मिन् नगरे ग्रामे अथवा क्षेत्रे भवन्तः निवसन्ति, किं तस्मिन् एतस्य कोऽपि प्रभावः आगतः आसीत् ?*